तदाकर्ण्य जगौ भिल्ल इत्थं तं प्रति भो मुने । नाहं मांससुरादीनां त्यागं कर्तुं क्षमोऽञ्जसा ॥१०४॥
तदाकूतं ततो ज्ञात्वा मुनिराह वनेचरम् । काकमांसं त्वया पूर्वं भक्षितं किं न वा दिश ॥१०५॥
तदाकर्ण्य स इत्याख्यत्कदाचित्तन्न भक्षितम् । मया ततो यमी प्राह यद्येवं तर्हि शर्मणे ॥१०६॥
भद्र त्वं नियमं तस्य गृहाण भक्षणेऽधुना । नियमेन विना यस्माज्जातु पुण्यं न धीमताम् ॥१०७॥
सोऽपि तद्वाक्यमाकर्ण्य संतुष्टो दीयतां व्रतम् । इत्युक्त्वाशु तदादाय यतिं नत्वा गृहं ययौ ॥१०८॥
कदाचित्तस्य संजातेऽसाध्ये रोगेऽशुभोदयात् । वैद्यस्तच्छान्तये काकमांसौषधं किलादिशत् ॥१०९॥
तदा तद्भक्षणे दक्षः स्वजनैः प्रेरितोऽवदत् । स इत्यहो व्रतं त्यक्त्वा दुर्लभं भवकोटिभिः ॥११०॥
रक्ष्यन्ते ये शठैः प्राणास्तैः किं साध्यं सुधर्मिणाम् । यतो भवे भवे प्राणाः स्युः स्यान्न च शुभं व्रतम् ॥
वरं प्राणपरित्यागो व्रतभङ्गान्न जीवितम् । प्राणत्यागाद्भवेत्स्वर्गः श्वभ्रं च व्रतभङ्गतः ॥११२॥
इति तन्नियमं श्रुत्वा सारसाख्यपुरात्तदा । आगच्छंस्तत्पुरं सूरवीरस्तन्मिथुनः शुचा ॥११३॥
महागहनमध्यस्थस्य वटस्याप्यधस्तले । कांचिद्देवीं रुदन्तीं संवीक्ष्याप्राक्षीदिति स्फुटम् ॥११४॥
का त्वं वा हेतुना केन रोदिषि ब्रूहि देवते । तदाकर्ण्याब्रवत्सेदं शृणु भद्र वचो मम ॥११५॥
वनयक्षी वसाम्यत्र वनेऽहं व्याधिपीडितः । त्वन्मैथुनो गतायुःखदिरसारोऽशुभाच्च यः ॥११६॥

और जीव-हिंसासे दूर रहना धर्म है ॥१०२॥ उस धर्मके करने पर उत्तम पुण्य होता है, पुण्यसे महान् स्वर्ग-सुख प्राप्त होता है। ऐसे धर्मका जो लाभ (प्राप्ति) यहाँपर हो, वही धर्म-लाभ कहा जाता है ॥१०३॥ यह सुनकर वह भील उनसे इस प्रकार बोला—हे मुनिराज, मैं मांस-भक्षण और मदिरा-पान आदिका निश्चित रूपसे त्याग करनेके लिए समर्थ नहीं हूँ ॥१०४॥ तब उसका अभिप्राय जानकर मुनिराजने उस भीलसे कहा—क्या तूने पहले कभी काकका मांस खाया, अथवा नहीं, यह मुझे बता ॥१०५॥ यह सुनकर वह बोला—मैंने कभी काक-मांस नहीं खाया है। तब योगी बोले—यदि ऐसी बात है तो हे भद्र, सुख-प्राप्तिके लिए तू अब उसके खानेके त्यागका नियम ग्रहण कर। क्योंकि नियमके विना बुद्धिमानोंको कभी पुण्य प्राप्त नहीं होता है ॥१०६-१०७॥ वह भील भी मुनिराजके यह वचन सुनकर सन्तुष्ट होकर बोला—'तब मुझे व्रत दीजिए', ऐसा कहकर और उनसे काक-मांस नहीं खानेका शीघ्र व्रत लेकर और मुनिको नमस्कार कर अपने घर चला गया ॥१०८॥

अथानन्तर किसी समय पापके उदयसे उसके असाध्य रोगके उत्पन्न होनेपर वैद्यने उस रोगकी शान्तिके लिए 'काक-मांस औषध है', ऐसा कहा ॥१०९॥ तब काक-मांसके खानेके लिए स्वजनोंसे प्रेरित हुआ वह चतुर भील इस प्रकार बोला—अहो, कोटि भवोंमें बड़ी कठिनतासे प्राप्त व्रतको छोड़कर जो अज्ञानी अपने प्राणोंकी रक्षा करते हैं, उससे धर्मात्माओं का क्या प्रयोजन साध्य है? क्योंकि प्राण तो भव-भवमें सुलभ हैं, किन्तु शुभव्रत पाना सुलभ नहीं है ॥११०-१११॥ इसलिए प्राणोंका परित्याग करना उत्तम है, किन्तु व्रत-भंग करके जीवित रहना अच्छा नहीं है। व्रतकी रक्षा करते हुए प्राण-त्यागसे स्वर्ग प्राप्त होगा और व्रत-भंग करनेसे नरक प्राप्त होगा ॥११२॥ (इस प्रकार कहकर उसने औषधरूपमें भी काक-मांसको खाना स्वीकार नहीं किया। रोग उत्तरोत्तर बढ़ने लगा। यह समाचार उसकी ससुराल पहुँचा।) तब उसके इस नियमको सुनकर सूरवीर नामका उसका साला शोकसे पीड़ित होकर अपने सारसपुरसे चला और मार्गमें आते हुए उसने महागहन वनके मध्यमें स्थित वटवृक्षके नीचे रोती हुई किसी देवीको देखकर पूछा—हे देवते, तू कौन है, और किस कारणसे रो रही है? यह सुनकर वह बोली—हे भद्र, तुम मेरे यह वचन सुनो ॥११३-११५॥ मैं वनयक्षी हूँ और इस वनमें रहती हूँ। पापके उदयसे तुम्हारा खदिरसार बहनोई व्याधिसे

काकमांसनिवृत्त्यात्तपुण्यान्मे भविता पतिः । मांसं भोजयितुं गच्छन् भजनं कर्तुमिच्छसि ॥११७॥
नरके घोरदुःखानां तस्य त्वं हि वृथा शठ । अनेन हेतुनाद्याहं करोमि रोदनं शुचा ॥११८॥
श्रुत्वा तदुक्तिमित्याह स हे देवि शुचं त्यज । नाहं तन्नियमस्यैव जातु भङ्गं करोम्यहम् ॥११९॥
इत्युक्त्वा तां स संतोष्य मङ्क्ष्वासाद्य तमातुरम् । परिणामपरीक्षायै तस्येदमब्रवीद्वचः ॥१२०॥
मित्रामयापनोदार्थं प्रभोक्तव्यमिदं त्वया । सत्यत्र जीवितव्ये भोः सत्पुण्यं क्रियते मुहुः ॥१२१॥
तच्छ्रुत्वा सोऽवदद्धीमान् सुहृत्प्रोक्तमिदं वचः । नोचितं ते जगन्निन्द्यं श्वभ्रदं धर्मनाशकृत् ॥१२२॥
अन्तावस्था ममायातो यमतो ब्रूहि संप्रति । किंचिद्धर्माक्षरं येनामुत्रात्मा मे सुखायते ॥१२३॥
ज्ञात्वा तन्निश्चयं सोऽनु यक्ष्याः सर्वं कथानकम् । फलं च तद्व्रतस्यैव सुप्रीत्या तमबूबुधत् ॥१२४॥
तच्छ्रुत्वाथ स संवेगं धर्मे धर्मफले सुधीः । त्यक्त्वा समस्तमांसादीन् जग्राहाणुव्रतानि च ॥१२५॥
कालान्ते तत्फलेनासौ मुक्त्वा प्राणान् समाधिना । महर्धिकामरो जातः सौधर्मेऽनेकशर्मभाक् ॥१२६॥
सूरवीरस्ततो गच्छन् स्वपुरं तत्र वीक्ष्य ताम् । साश्चर्यहृदयो यक्षीमित्यपृच्छद् गिरा स्वयम् ॥१२७॥
देवि मन्मैथुनः किं ते पतिर्जातो न वाधुना । साहेदं मे पतिर्नासीत्स किन्तु निर्जरोऽजनि ॥१२८॥
सर्वव्रतोत्थपुण्येन कल्पे सौधर्मनामनि । महर्धिको गुणाढ्योऽस्मद्व्यन्तरत्वपराङ्मुखः ॥१२९॥
तत्र भुङ्क्ते परं सौख्यं देवीनिकरसंभवम् । स्वर्गलक्ष्मीं स आसाद्य कुर्वन् पूजां जिनेशिनाम् ॥१३०॥
तदाकर्ण्य स इत्थं स्वहृदयेऽचिन्तयत्सुधीः । अहो पश्य व्रतस्येदं प्रवरं फलमञ्जसा ॥१३१॥

पीड़ित है। वह मरकर काक-मांसकी निवृत्तिसे प्राप्त पुण्यके फलसे मेरा पति होगा। किन्तु हे शठ, काक-मांस खिलानेके लिए जाते हुए तुम उसे नरकमें भेजकर वृथा ही घोर दुःखोंका भाजन बनाना चाहते हो। इस कारण शोकसे आज मैं रोदन कर रही हूँ ॥११६-११८॥ उसकी यह बात सुनकर वह बोला—हे देवि, तुम शोकको छोड़ो, मैं उसके नियमका कभी भी भंग नहीं करूँगा ॥११९॥

इस प्रकार कहकर और उसे सन्तुष्ट कर वह शीघ्र उस बीमार खदिरसारके पास आया और उसके परिणामोंकी परीक्षाके लिए ये वचन बोला ॥१२०॥ हे मित्र, रोगके दूर करनेके लिए तुम्हें यह काक-मांस उपयोगमें लेना चाहिए। अरे, जीवनके रहनेपर यह पुण्य तो फिर भी किया जा सकता है ॥१२१॥ अपने सालेके यह वचन सुनकर वह बुद्धिमान् खदिरसार बोला—हे मित्र, ये लोक-निन्द्य, नरक देनेवाले और धर्मके नाशक वचन कहना उचित नहीं है ॥१२२॥ मेरी यह अन्तिम अवस्था आ गयी है, अतः इस समय तुम धर्मके कुछ अक्षर बोलो, जिससे कि परलोकमें मेरी यह आत्मा सुखी होवे ॥१२३॥ उसका यह निश्चय जानकर तत्पश्चात् उसने यक्षीका सर्व कथानक और उसके व्रतका फल अतिप्रीतिसे खदिरसारको बतलाया ॥१२४॥ उसके वचन सुनकर उस सुधी खदिरसारने धर्म और धर्मके फलमें संवेगको धारण कर और सर्व प्रकारके मांसादिकको छोड़कर अणुव्रतोंको ग्रहण कर लिया ॥१२५॥ जीवन-कालके अन्तमें प्राणोंको समाधिसे त्यागकर वह उसके फलसे सौधर्म स्वर्गमें अनेक सुखोंका भोक्ता महर्धिक देव हुआ ॥१२६॥

तत्पश्चात् अपने नगरको जाते हुए सूरवीरने वनके उसी स्थानपर उस यक्षीको देखकर आश्चर्ययुक्त हृदय होकर उससे स्वयं ही पूछा—हे देवि, मेरा वह बहनोई क्या अब तेरा पति हुआ है, अथवा नहीं हुआ है? वह बोली—वह मेरा पति नहीं हुआ, किन्तु सर्व व्रतोंसे उपार्जित पुण्यसे सौधर्म नामके प्रथम स्वर्गमें हमारी व्यन्तरोंकी क्षुद्रजातिसे पराङ्मुख, उत्कृष्ट जातिका महाऋद्धिधारी देव हुआ है ॥१२७-१२९॥ वहाँपर वह स्वर्गकी लक्ष्मीको पाकर जिनेश्वर देवकी पूजाको करता हुआ देवियोंके समूहसे उत्पन्न हुए परम सुखको भोग रहा है ॥१३०॥ यक्षीकी यह बात सुनकर वह बुद्धिमान् सूरवीर अपने हृदयमें इस प्रकार विचारने

येन व्रतेन लभ्यन्तेऽमुत्रदृश्योऽत्र संपदः । विना तेन न योग्यैका नेतुं कालकला क्वचित् ॥१३२॥
विचिन्त्येति स गत्वाशु समाधिगुप्तयोगिनम् । नत्वा मुदाग्रहीद् भव्यो व्रतानि गृहमेधिनाम् ॥१३३॥
स्वर्गात्खदिरसाराङ्गिदेवो भुक्त्वा सुखं महत् । स द्विसागरपर्यन्तं च्युत्वा पुण्यविपाकतः ॥१३४॥
सूनुः कुणिकभूपस्य श्रीमत्याश्च नृपोत्तमः । जातस्त्वं श्रेणिको नाम्ना भव्यश्रेणिशिवाग्रणीः ॥१३५॥
तत्कथाश्रवणात्प्राप्य तत्त्वे श्रद्धां परां नृपः । जिनेन्द्रधर्मगुर्वादौ पुनर्नत्वा पप्रच्छ तम् ॥१३६॥
देव मे महती श्रद्धा विद्यते धर्मकर्मणि । हेतुना केन न स्याच्च मनाग्व्रतगुणोऽधुना ॥१३७॥
उवाचेदं ततो योगी धीमंस्त्वं बद्धवानिह । प्रागेव नरकायुष्कं गाढमिथ्यात्वभावतः ॥१३८॥
हिंसादिपञ्चपापाच्च बह्वारम्भपरिग्रहात् । अतीवविषयासक्त्या बौद्धभक्त्या वृषादृते ॥१३९॥
तेन दोषेण ते नास्ति मनाग्व्रतपरिग्रहः । बद्धदेवायुषो यस्मात्स्वीकुर्वन्ति द्विधा व्रतम् ॥१४०॥
आज्ञाख्यं मार्गसम्यक्त्वं ह्युपदेशाभिधं ततः । सूत्राह्वयं च बीजाख्यं संक्षेपाख्यं सविस्तरम् ॥१४१॥
अर्थोत्थमवगाढं परमावगाढसंज्ञकम् । दशधेति सुसम्यक्त्वं सोपानं प्रथमं शिवे ॥१४२॥
सर्वज्ञाज्ञानिमित्तेन षड्द्रव्यादिषु या रुचिः । जायते महती तत्स्यादाज्ञासम्यक्त्वमुत्तमम् ॥१४३॥
अत्र निःसङ्गनिश्चेलपाणिपात्रादिलक्षणम् । श्रुत्वा या मोक्षमार्गस्य श्रद्धा तन्मार्गदर्शनम् ॥१४४॥
त्रिषष्टिपुरुषादीनां पुराणश्रवणाच्च यः । सद्यः स्यान्निश्चयोऽत्रैतदुपदेशाख्यदर्शनम् ॥१४५॥

लगा—अहो, व्रतको शीघ्र प्राप्त हुए उत्तम फलको देखो ॥१३१॥ जिस व्रतके द्वारा परलोकमें ऐसी स्वर्ग-सम्पदाएँ प्राप्त होती हैं, उस व्रतके बिना मनुष्यको कालकी एक कला भी कभी बिताना योग्य नहीं है ॥१३२॥ ऐसा विचार कर और शीघ्र ही समाधिगुप्त मुनिराजके पास जाकर, उन्हें नमस्कार कर उस भव्यने गृहस्थोंके व्रतोंको हर्षके साथ ग्रहण कर लिये ॥१३३॥

खदिरसारका जीव वह देव दो सागरोपम काल तक वहाँके महासुखोंको भोगकर और स्वर्गसे च्युत होकर पुण्यके विपाकसे कुणिक राजा और श्रीमती रानीके श्रेणिक नामसे प्रसिद्ध नृपोत्तम और भव्य जीवोंकी पंक्तिमें-से मोक्ष जानेमें अग्रेसर पुत्र हुआ है ॥१३४-१३५॥ अपने पूर्वजन्मकी इस कथाको सुननेसे तत्त्वोंमें जिनेन्द्रदेव, जिनधर्म और जिनगुरु आदिमें परम श्रद्धाको प्राप्त होकर उन्हें नमस्कार कर पुनः पूछा ॥१३६॥ हे देव, धर्मकार्यमें मेरी भारी श्रद्धा है, किन्तु किस कारणसे अभी तक मेरे कोई जरा-सा भी व्रत या गुण धारण करनेका भाव नहीं हो रहा है ॥१३७॥ यह सुनकर गौतम गणधरने कहा—हे सुधी, तीव्र मिथ्यात्वभावके द्वारा आजसे पूर्व ही तूने इसी जीवनमें हिंसादि पाँचों पापोंके आचरणसे, बहुत आरम्भ और परिग्रहसे, अत्यन्त विषयासक्तिसे और सत्य धर्मके विना बौद्धोंकी भक्तिसे नरकायुको बाँध लिया है, अतः उस दोषसे तेरे रंचमात्र भी व्रतका परिग्रह नहीं है। क्योंकि देवायुको बाँधनेवाले जीव ही मुनि और श्रावकके दो भेदरूप धर्मको स्वीकार करते हैं ॥१३८-१४०॥ (अपने नरकायुका बन्ध सुनकर राजा श्रेणिक मन ही मन विचारने लगा-अहो भगवान्, तब इससे मेरा कैसे छुटकारा होगा? उसके मनकी यह बात जानकर गौतमने कहा—) संसारसे उद्धार करनेवाला सम्यक्त्व है। वह दश प्रकारका है—१ आज्ञासम्यक्त्व, २ मार्ग सम्यक्त्व, ३ उपदेशसम्यक्त्व, ४ सूत्रसम्यक्त्व, ५ बीजसम्यक्त्व, ६ संक्षेपसम्यक्त्व, ७ विस्तारसम्यक्त्व, ८ अर्थोत्पन्नसम्यक्त्व, ९ अवगाढ़सम्यक्त्व और १० परमावगाढ़सम्यक्त्व। यह दश प्रकारका सम्यक्त्व मोक्षरूप प्रासादमें जानेके लिए प्रथम सोपान है ॥१४१-१४२॥ सर्वज्ञदेवकी आज्ञाके निमित्तसे जीवादि छह द्रव्योंमें दृढ़ रुचि या श्रद्धा होती है, वह उत्तम आज्ञासम्यक्त्व है ॥१४३॥ यहाँ पर परिग्रह-रहित निश्चेल (वस्त्र-रहित दिगम्बर) और पाणिपात्रभोजी साधु आदिके लक्षणवाले निर्ग्रन्थ धर्मको मोक्षमार्गकी जो दृढ़ श्रद्धा उत्पन्न होती है, वह मार्ग सम्यक्त्व है ॥१४४॥ तिरेसठ शलाका पुरुष आदि

आचाराख्यादिमाङ्गोक्ततपःक्रियाश्रुतेर्विदाम् । प्रादुर्भूता रुचिर्यात्र सूत्रसम्यक्त्वमेव तत् ॥१४६॥
या तु बीजपदादानात्सूक्ष्मार्थश्रवणाद्रुचिः । प्रादुर्भवति भव्यानां बीजदर्शनमेव तत् ॥१४७॥
याभूच्छ्रद्धा पदार्थानां संक्षेपोक्त्यात्र धीमताम् । संक्षेपदर्शनं तद्धि कथ्यते शर्मकारणम् ॥१४८॥
विस्तरोक्त्या पदार्थानां प्रमाणनयविस्तरैः । यो निश्चयोऽत्र तत्सारं सम्यक्त्वं विस्तराह्वयम् ॥१४९॥
अवगाह्याङ्गवार्धिं च त्यक्त्वा वचनविस्तरम् । आदायात्रार्थमात्रं या रुचिस्तदर्थदर्शनम् ॥१५०॥
अङ्गाङ्गबाह्यसद्भावभावनातोऽत्र या रुचिः । जाता क्षीणकषायस्यावगाढं दर्शनं हि तत् ॥१५१॥
केवलावगमालोकिताखिलार्थगता रुचिः । या सम्यक्त्वं परं तत्परमावगाढसंज्ञकम् ॥१५२॥
दशभेदं जिनेन्द्रोक्तं सम्यक्त्वमिति तत्त्वतः । तेषां मध्ये कियन्तस्ते तद्भेदाः सन्ति भूपते ॥१५३॥
त्वं दर्शनविशुद्ध्याद्यैर्व्यस्तैः षोडशकारणैः । समस्तैश्च जगद्वन्द्यैरन्ते श्रीत्रिजगद्गुरोः ॥१५४॥
बद्ध्वात्र तीर्थकृन्नाम जगदाश्चर्यकारणम् । ध्रुवं रत्नप्रभामन्ते कर्मपाकेन यास्यसि ॥१५५॥
तत्फलं तत्र भुक्त्वा चतुर्भिः कालाब्दमानकैः । तस्मान्निर्गत्य भव्यस्त्वं महापद्माख्यतीर्थकृत् ॥१५६॥
भविष्यसि न संदेहो धर्मतीर्थप्रवर्तकः । आगाम्युत्सर्पिणीकाले प्रथमः क्षेमकृत्सताम् ॥१५७॥
तस्मादासन्नभव्यस्त्वं मा भैषीः संसृतेर्यतः । भ्रमन्तः प्राणिनोऽनेकवारान् प्राङ्नरकं गताः ॥१५८॥
स्वस्य रत्नप्रभावाप्तिश्रवणाच्छ्रेणिकस्तदा । विषण्णस्तं पुनर्नत्वेत्यपृच्छच्छ्रीगणाधिपम् ॥१५९॥
भगवन्मत्पुरेऽत्रास्मिन् विशाले पुण्यधामनि । मां विनाधोगतिं कश्चिदन्यो यास्यति वा न च ॥१६०॥

महामानवोंके पुराणोंको सुननेसे जो आत्म-निश्चय या धर्म-श्रद्धान उत्पन्न होता है, वह लोकमें उपदेशनामक सम्यक्त्व है ॥१४५॥ आचारादि अंगोंमें कही तपश्चरणक्रियाके सुननेसे ज्ञानियोंको जो उसमें रुचि उत्पन्न होती है, वह सूत्रसम्यक्त्व है ॥१४६॥ बीजपदोंको ग्रहण करनेसे और उनके सूक्ष्म अर्थके सुननेसे भव्यजीवोंके जो तत्त्वार्थमें रुचि उत्पन्न होती है, वह बीज सम्यक्त्व है ॥१४७॥ जीवादि पदार्थोंके संक्षेप कथनको सुनकर ही जो बुद्धिमानोंके हृदयमें श्रद्धा उत्पन्न होती है वह सुखकारण संक्षेपसम्यक्त्व कहा जाता है ॥१४८॥ जीवादि पदार्थोंके विस्तार-युक्त कथनको सुनकर प्रमाण और नयोंके विस्तारद्वारा जो धर्ममें निश्चय उत्पन्न होता है, वह विस्तार सम्यक्त्व है ॥१४९॥ द्वादशांगश्रुतरूप समुद्रका अवगाहन कर वचन-विस्तारको छोड़कर और अर्थमात्रको अवधारण कर जो श्रद्धा उत्पन्न होती है, वह अर्थसम्यक्त्व है ॥१५०॥ अंगप्रविष्ट और अंगबाह्य श्रुतके रहस्य चिन्तनसे क्षीणकषायी योगीके जो दृढ़ रुचि उत्पन्न होती है, वह अवगाढ़सम्यक्त्व है ॥१५१॥ तथा केवलज्ञानके द्वारा अवलोकित समस्त पदार्थोंपर जो चरम सीमाको प्राप्त अत्यन्त दृढ़ रुचि उत्पन्न होती है वह परमावगाढ़ नामका सम्यक्त्व है ॥१५२॥ इस प्रकार जिनेन्द्र देवने तात्त्विक दृष्टिसे सम्यक्त्वके दश भेद कहे हैं। हे राजन्, उनमें-से कितने भेद तेरे हैं ॥१५३॥ जगद्-वन्द्य दर्शनविशुद्धि आदि षोड़श कारणोंमेंसे कुछ या सब कारणोंसे त्रिजगद्-गुरु श्री वर्धमान-स्वामीके समीप जगत्में आश्चर्यका कारण तीर्थंकर नामकर्म यहाँपर निश्चयसे बाँधकर जीवनके अन्तमें पूर्वोपार्जित कर्मके उदयसे रत्नप्रभापृथिवीवाले नरकमें जाओगे। वहाँपर उपार्जित कर्मोंका फल भोगकर आगामी चार काल-प्रमाण अर्थात् चौरासी हजार वर्षोंके बाद वहाँसे निकलकर हे भव्य, तू महापद्मनामका धर्मतीर्थका प्रवर्तक, सज्जनोंका क्षेम-कुशलकर्ता, आगामी उत्सर्पिणी कालमें प्रथम तीर्थंकर होगा, इसमें कोई सन्देह नहीं है ॥१५४–१५७॥ हे राजन्, तुम निकटभव्य हो, अब इस अल्पकालिक संसारके परिभ्रमणसे मत डरो। क्योंकि इसके भीतर परिभ्रमण करनेवाले प्राणी अनेक बार पहले नरक गये हैं ॥१५८॥ अपनी रत्न-प्रभागत नरककी प्राप्तिकी बात सुनकर विषादको प्राप्त हुए श्रेणिकने पुनः श्री गौतमगणधरको नमस्कार करके इस प्रकार पूछा ॥१५९॥ हे भगवन्, इस विशाल, पुण्यधामवाले मेरे नगरमें

तदनुग्रहधर्माय ततः श्रीगौतमो जगौ । श्रृणु धीमन् वचस्तथ्यं भवच्छोकापनोदकम् ॥१६१॥
कालशौकरिकोऽत्रैव पुरे नीचकुले भृशम् । भवस्थितिवशाद् बद्धमनुष्यायुः कुकर्मणा ॥१६२॥
सप्तकृत्वोऽधुना जातिस्मरो भूत्वेत्यचिन्तयत् । पुण्यपापफलेनाहो संबन्धोऽस्त्यङ्गिनां यदि ॥१६३॥
तर्हि पुण्यादृते कस्मात्प्राप्तोऽयं नृभवो मया । ततः पापं न पुण्यं वा श्रेयो वैषयिकं सुखम् ॥१६४॥
इति मत्वा स पापात्मा भूत्वा निःशङ्क एव च । हिंसादिपञ्चपापानि मांसाद्याहारमञ्जसा ॥१६५॥
करोति तत्फलेनैव बह्वारम्भपरिग्रहैः । बद्धश्वभ्रायुरन्तेऽघाद्यास्यस्ति श्वभ्रमन्तिमम् ॥१६६॥
शुभाख्या द्विजपुत्री च रागान्धा मदविह्वला । उग्रस्त्रीवेदपाकेन निःशीला निर्विवेकिनी ॥१६७॥
गुणशीलसदाचारान् वीक्ष्य श्रुत्वातिकोपिनी । अतीवेन्द्रियलाम्पट्यान्नरकायुर्बबन्ध च ॥१६८॥
रौद्रध्यानेन मृत्वेति ततः सात्र गमिष्यति । सर्वदुःखखनीं निन्द्यां पापात्तमःप्रभावनिम् ॥१६९॥
इति तद्वचनस्यान्ते प्रणिपत्य गणाधिपम् । अभयाख्यः कुमारः पप्रच्छ स्वस्य भवान्तरम् ॥१७०॥
तदनुग्रहबुद्ध्यासौ प्राह तस्य भवावलीम् । इहैव भरते विप्रतनूजः सुन्दराभिधः ॥१७१॥
मूढत्रययुतो भद्रो मिथ्यादृष्टिर्व्रजन् पथि । वेदाभ्यासाय स जैनार्हद्दासेन समं कुधीः ॥१७२॥
वीक्ष्य पाषाणराशिं च पिप्पलाधःस्थितां पराम् । देवोऽयं मम हीत्युक्त्वानमत्परीत्य तं द्रुमम् ॥१७३॥
तच्चेष्टां वीक्ष्य तद्बोधनाय प्रहस्य तं तरुम् । पादेन मर्दनं कृत्वाश्वर्हद्दासो बभञ्ज सः ॥१७४॥

मेरे विना क्या और कोई पुरुष अधोगति (नरक) को जायेगा, या नहीं ? श्रेणिककी बात सुनकर उसके अनुग्रह करनेके लिए श्रीगौतमने कहा—हे धीमन्, तेरे शोकको दूर करनेवाले मेरे यथार्थ वचन सुनो ॥१६०-१६१॥ इसी राजगृहनगरमें भवस्थितिके वशसे पूर्वभवमें मनुष्यायुको बाँधकर नीचगोत्रके उदयसे अत्यन्त नीच कुलमें उत्पन्न हुआ कालशौकरिक नामका कसाई रहता है। अब उसे सात भव-सम्बन्धी जातिस्मरणज्ञान उत्पन्न हुआ है, अतः वह विचारने लगा है कि यदि पुण्य-पापके फलसे जीवोंका सम्बन्ध होता, तो मैंने पुण्यके बिना यह मनुष्य जन्म कैसे पा लिया ? इसलिए न पुण्य है और न पाप है। किन्तु इन्द्रियोंके विषयोंसे उत्पन्न हुआ वैषयिक सुख ही कल्याण-कारक है ॥१६२-१६४॥ ऐसा मानकर वह पापात्मा निःशंक होकर हिंसादि पाँचों पापोंको और मांसादिके आहारको निश्चयतः करता है। इन पापोंके फलसे तथा बहुत आरम्भ और परिग्रहसे उसने नरकायुको बाँध लिया है। जीवनके अन्तमें वह उक्त पापोंके उदयसे अन्तिम (सातवें) नरकको जायेगा ॥१६५-१६६॥ तथा इसी नगरमें शुभानामवाली एक ब्राह्मणपुत्री है, वह रागसे अन्धी और मदसे विह्वल है। तीव्र स्त्रीवेदके उदयसे शील-रहित है, अर्थात् व्यभिचारिणी है, और विवेक-रहित है। वह गुणी, शीलवान् और सदाचारी पुरुषोंको देखकर और सुनकर अत्यन्त कुपित होती है। उसने भी इन्द्रिय विषय-सेवनकी अतीव लम्पटतासे नरकायु बाँध ली है। वह भी जीवनके अन्तमें रौद्रध्यानसे मरकर पापके फलसे निन्द्य और सर्वदुःखोंकी खानिवाली तमःप्रभा नामकी छठी नरकभूमि जायेगी ॥१६७-१६९॥ (यह सुनकर राजा श्रेणिक कुछ आश्वस्त हुए।)

जब गौतमस्वामी नरक जानेवाले उक्त दोनोंकी बात कह चुके, तब अभयकुमारने गणधरदेवको नमस्कार करके अपने पूर्वभवोंको पूछा ॥१७०॥ उसके अनुग्रहकी बुद्धिसे गौतमस्वामीने उसकी भवावलीको इस प्रकारसे कहना प्रारम्भ किया—हे भद्र, इस भरत क्षेत्रमें सुन्दरनामका एक ब्राह्मणपुत्र था। वह तीन मूढ़ताओंसे युक्त मिथ्यादृष्टि था। वह कुबुद्धि वेदोंके अभ्यासके लिए एकवार जब अर्हद्दास जैनीके साथ मार्गमें जा रहा था तब किसी स्थान पर पीपलके वृक्षके नीचे रखी हुई पत्थरोंकी राशिको देखकर 'यह मेरा देव है' ऐसा कहकर और उस वृक्षकी तीन प्रदक्षिणा देकर उसने उसे नमस्कार किया ॥१७१-१७३॥ उसकी यह चेष्टा देखकर उसे समझानेके लिए अर्हद्दासने हँसकर और पैरसे उसे मर्दन कर उसे

ततोऽग्रे कपिरोमाख्यवल्लीजालं समाप्य सः । श्रावको मद्देवोऽयमित्युक्त्वा माययानमत् ॥१७५॥
कराभ्यां सुन्दरश्छिन्दन् विगृह्णंस्तत्तदीर्षया । सर्वाङ्गे तत्कृतासह्यकण्डूयबाधनात्तराम् ॥१७६॥
भीत्वा तस्माज्जजल्पेति सत्यस्ते देव एव हि । ततो विहस्य जैनोऽवादीत्तत्संबोधहेतवे ॥१७७॥
रे भद्र तरवोऽत्रैते निग्रहानुग्रहच्युताः । एकेन्द्रियत्वमापन्नाः पापाद्देवा न जातुचित् ॥१७८॥
किन्तु तीर्थंकरा एव भुक्तिमुक्तिकराः सताम् । त्रिजगज्ज्ञानतोऽभ्यचर्या देवाः स्युर्नात्र चापरे ॥१७९॥
इत्यादिवचनैस्तस्य देवमौढ्यं निराकरोत् । ततः क्रमाद् द्विजौ गच्छन्तौ गङ्गातीरमागतौ ॥१८०॥
तीर्थनीरमिदं नूनं पवित्रं शुद्धिकारणम् । इत्युक्त्वा तज्जलैः स्नात्वा मिथ्यादृष्टिरवन्दत ॥१८१॥
तत्रास्मै भोक्तुकामाय भुक्त्वा भोक्तुं स्वयं ददौ । स्वोच्छिष्टान्नं च गङ्गाम्बुमिश्रितं श्रावकोत्तमः ॥१८२॥
तं दृष्ट्वाहं कथं भुञ्जेऽन्योच्छिष्टमिति सोऽवदत् । ततो जैन उवाचेदं तस्य सन्मार्गसिद्धये ॥१८३॥
मित्राशुद्धं मयोच्छिष्टं गङ्गाम्बु यदि निन्दितम् । गर्दभाद्यैस्तदुच्छिष्टं कथं शुद्धं च शुद्धिदम् ॥१८४॥
अतो जलं न तीर्थं न जातु शुद्धिकरं नृणाम् । स्नानं तथाङ्गिघाताच्च केवलं पापकारणम् ॥१८५॥
देहोऽशुच्याकरे नित्यं स्वभावान्निर्मलोऽसुमान् । शुद्धिं स्नानेन नायाति तस्मात्स्नानं वृथाघदम् ॥१८६॥
स्नानेन यदि शुद्धाः स्युर्मिथ्यात्वादिमलीमसाः । तर्हि मत्स्यादयो वन्द्याः शुद्धये न दयान्विताः ॥१८७॥
किंत्वर्हत्तीर्थमेवात्र तद्वाक्यामृतमुत्तमम् । विद्धि शुद्धिकरं पुंसामन्तःपापमलापहम् ॥१८८॥

तोड़ दिया ॥१७४॥ वहाँसे आगे जानेपर कपिरोमा (करेंच) नामकी वेलिके समूहको देखकर उस अर्हद्दास श्रावकने 'यह मेरा देव है' ऐसा कहकर मायाचारसे उसे नमस्कार किया ॥१७५॥ यह देखकर उस सुन्दर ब्राह्मण-पुत्रने पहलेकी ईर्ष्यासे उसे दोनों हाथोंसे उखाड़कर और उसकी फलियोंको मसलकर सारे शरीरमें रगड़ डाला। उसकी रगड़से उसके सारे शरीरमें असह्य वेदना हुई। उससे डरकर वह अर्हद्दाससे बोला—अहो, तेरा देव सच्चा है। तब वह जैनी हँसकर उसके सम्बोधनके लिए बोला ॥१७६-१७७॥ अरे भद्र, ये वृक्ष पापके उदयसे यहाँ एकेन्द्रिय वनस्पतिकी पर्यायको प्राप्त हैं। ये किसीका निग्रह या अनुग्रह करनेमें असमर्थ हैं, ये कभी देव नहीं कहे जा सकते ॥१७८॥ किन्तु सच्चे देव तो तीर्थंकर ही हैं, जो कि सांसारिक सुख और मुक्तिको देनेवाले हैं, तीन लोकके ज्ञानसे युक्त हैं। वे ही पूजनीय देव हैं। उनके सिवा इस लोकमें और कोई देव नहीं है ॥१७९॥ इत्यादि वचनोंसे अर्हद्दासने उस ब्राह्मण-पुत्रकी देव मूढ़ताको दूर किया। तत्पश्चात् क्रमसे चलते हुए वे दोनों गंगा नदीके किनारे आ पहुँचे ॥१८०॥ तब उस मिथ्यादृष्टि ब्राह्मणपुत्रने 'यह तीर्थजल निश्चयसे पवित्र है, शुद्धिका कारण है' यह कहकर उसके जलसे स्नान कर उसकी वन्दना की ॥१८१॥ वहाँपर उस श्रावकोत्तम अर्हद्दासने भोजन किया और खानेका इच्छुक देखकर उस ब्राह्मणपुत्रको अपने खानेसे बचे हुए जूठे अन्नको गंगाके जलसे मिश्रित कर उसे खानेके लिए दिया। यह देखकर वह बोला कि इन जूठे अन्नको मैं कैसे खा सकता हूँ? तब उसको सन्मार्ग प्राप्त करानेके लिए वह जैनी बोला—हे मित्र, गंगाजलसे मिश्रित भी यह जूठा अन्न यदि निन्दनीय है तो गधे आदिसे जूठा किया गया जल कैसे शुद्ध और शुद्धिको देनेवाला हो सकता है ॥१८२-१८४॥ अतः न जल पवित्र है, न जलस्थान तीर्थ है और न उसमें किया गया स्नान मनुष्योंकी शुद्धि कर सकता है। किन्तु जलमें स्नान करनेसे अनेक प्राणियोंका नाश होता है, अतः वह केवल पापका कारण ही है ॥१८५॥ यह शरीर स्वभावसे अशुचिका भण्डार है, किन्तु इसके भीतर विराजमान आत्मा शुद्ध है, निर्मल है। स्नानसे पवित्रता नहीं आती है, इस कारण स्नान करना व्यर्थ ही पापोंका उपार्जन करनेवाला है ॥१८६॥ मिथ्यात्व आदि भावमलसे मलिन जीव यदि स्नान करनेसे शुद्ध होते होवें, तब तो नित्य ही जलमें स्नान करनेवाले मगर-मच्छादि वन्दन करनेके योग्य हैं, दयायुक्त मनुष्य नहीं ॥१८७॥ इस-

इति संबोधनोपायैर्वाक्यैस्तीर्थादिसूचकैः । अर्हद्दासो बलात्तस्य तीर्थमौढ्यमपाकरोत् ॥१८९॥
तत्र पञ्चाग्निमध्यस्थं तापसं वीक्ष्य सोऽवदत् । पश्य मद्दर्शने सन्ति बह्वीदृशास्तपस्विनः ॥१९०॥
अर्हद्दासः स तद्गर्वहानये तमभाषत । तापसं तपसोऽनेकैः कौलिकागमभाषणैः ॥१९१॥
ततस्तं निर्मदं कृत्वा जैनोऽवादीदिति स्फुटम् । भद्रैते किं तपः कर्तुं क्षमाः स्युः कुतपस्विनः ॥१९२॥
किन्तु देवा महान्तोऽत्र सर्वज्ञा एव भूतले । निर्ग्रन्था गुरवो वन्द्याः कार्यो धर्मो दयामयः ॥१९३॥
जिनोक्तमेव सिद्धान्तं तथ्यं विश्वाग्रदीपकम् । जिनं च शासनं वन्द्यं शरणं च तपोऽनघम् ॥१९४॥
एतेषां निश्चयं कृत्वा गृहाण मित्र दर्शनम् । कुमार्गं शत्रुवत्त्यक्त्वा धर्ममूलं सुखाकरम् ॥१९५॥
इति तद्बोधनं श्रुत्वा नत्वा तं सुन्दरो मुदा । काललब्ध्याददौ त्यक्त्वा मिथ्यात्वं दर्शनं वृषम् ॥१९६॥
ततो मित्रत्वमापन्नौ ह्यटवीगहनान्तरे । गच्छन्तौ प्रापतुः पापोदयाद्दिग्मूढतां द्विजौ ॥१९७॥
तत्रैवामानुषेऽरण्ये जीवनोपायवर्जिते । विदित्वा शरणं चैकं जिनधर्मं जिनाधिपम् ॥१९८॥
हित्वाहारशरीरादीन् प्रोत्साहं प्रविधाय तौ । संन्यासं शिवसिद्ध्यर्थमगृह्णातां बुधोत्तमौ ॥१९९॥
ततः सोढ्वातिधैर्येण क्षुत्तृषादिपरीषहान् । मुक्त्वा समाधिना प्राणान् शुभध्यानेन तौ द्विजौ ॥२००॥
तदाचारोत्थपुण्येन सौधर्मेऽतिमहर्धिकौ । अभूतां सुरसंसेव्यौ देवौ दिव्यसुखोदयौ ॥२०१॥
तत्र भुक्त्वामरं सौख्यं चिरं च्युत्वा शुभोदयात् । स सुन्दरचरो नाकी ततः श्रेणिकभूपतेः ॥२०२॥

लिए हे भद्र, यह गंगा तीर्थ नहीं है, किन्तु अर्हन्तदेव ही तीर्थ हैं और उनका वचनरूप अमृत जल ही जीवोंकी शुद्धि करनेवाला और अन्तरंग मलका विनाशक है ॥१८८॥ इस प्रकार तीर्थादिके सूचक सम्बोधनात्मक वचनोंसे अर्हद्दासने हठात् उसकी तीर्थमूढ़ता दूर की ॥१८९॥ वहीं कुछ दूरपर गंगाके किनारे ही पंचाग्निके मध्यमें बैठे किसी तापसको देखकर वह विप्रपुत्र बोला—देखो, मेरे मतमें ऐसे-ऐसे बहुत-से तपस्वी हैं ॥१९०॥ तब उस अर्हद्दासने उसके गर्वको दूर करनेके लिए कौलिकशास्त्रके तपसम्बन्धी अनेक वचनोंके द्वारा उस तापसके साथ सम्भाषण किया और अपनी प्रबल युक्तियोंसे उसे मद-रहित करके उस जैनीने उस ब्राह्मण-पुत्रसे स्पष्ट कहा—हे भद्र, ये कुतपस्वी क्या सच्चा तप करनेके लिए समर्थ हैं ? अर्थात् नहीं हैं। किन्तु इस भूतलपर सर्वज्ञदेव ही सच्चे महान् देव हैं, परिग्रहरहित निर्ग्रन्थ साधु ही सच्चे साधु हैं और वे ही वन्दनीय हैं। मनुष्यको दयामयी धर्म ही सेवन करना चाहिए ॥१९१-१९३॥ जिनदेवके द्वारा उपदिष्ट सिद्धान्त ही सत्य है और वही विश्वकी सर्व वस्तुओं-का दर्शक है, जिनशासन ही वन्दन करनेके योग्य है और हिंसादि पापोंसे रहित निर्दोष तप ही प्राणियोंको शरण देनेवाला है ॥१९४॥ इसलिए हे मित्र, कुमार्गको शत्रुके समान छोड़कर इन सत्यार्थ देव-शास्त्र-गुरु और दयामयी धर्मका निश्चय करके सम्यग्दर्शनको ग्रहण करो। यह सम्यग्दर्शन ही धर्मका मूल है और सर्व सुखोंकी खानि है ॥१९५॥ इस प्रकार उस अर्हद्दासके सम्बोधक वचनोंको सुनकर उस सुन्दर विप्रपुत्रने हर्षके साथ मिथ्यादर्शनको छोड़कर काललब्धिके प्रभावसे सत्यधर्मको ग्रहण कर लिया ॥१९६॥

तत्पश्चात् मित्रताको प्राप्त वे दोनों द्विज गहन अटवीके मध्यमें जाते हुए पापोदयसे दिग्मूढ़ताको प्राप्त हो गन्तव्य दिशा भूल गये ॥१९७॥ जीवनके उपायसे रहित निर्जन वनमें एक-मात्र जिनेन्द्रदेव और जिनधर्मको ही शरण जानकर उन दोनों उत्तम ज्ञानियोंने आहार-शरीर आदिका त्याग कर और उत्साहको धारण कर मुक्तिकी सिद्धिके लिए संन्यासको ग्रहण कर लिया ॥१९८-१९९॥ तदनन्तर अति धैर्यके साथ क्षुधा-तृषादि परीषहोंको सहनकर और शुभध्यानसे समाधिपूर्वक प्राणोंको छोड़कर वे दोनों ब्राह्मण इस व्रताचरणसे उपार्जित पुण्यके द्वारा सौधर्मस्वर्गमें भारी ऋद्धिके धारक अनेक सुरोंसे पूजित एवं दिव्य सुखोंके भोक्ता देव हुए ॥२००-२०१॥ वहाँपर पुण्योदयसे देव-सम्बन्धी सुखको चिरकाल तक भोगकर वह सुन्दर

दक्षः सूनुर्महाप्राज्ञोऽजनिष्टस्त्वमिहेदृशः । द्रुतमाप्स्यसि निर्वाणं तपसा च विधेः क्षयात् ॥२०३॥
इति तत्सत्कथां श्रुत्वा केचिद्वैराग्यवासिताः । आददुः संयमं केचिद् हृदि धर्मं च दर्शनम् ॥२०४॥
ससुतः श्रेणिकस्तस्मात्पीतधर्मश्रुतामृतः । नत्वा च श्रीजिनं भक्त्या गणेशान् स्वपुरं ययौ ॥२०५॥
अथैन्द्रभूतिरेवाद्यो वायुभूत्यग्निभूतिकौ । सुधर्ममौर्यमौण्ड्याख्यपुत्रमैत्रेयसंज्ञकाः ॥२०६॥
अकम्पनोऽन्धवेलाख्यः प्रभासोऽमी सुरार्चिताः । एकादश चतुर्ज्ञानाः सन्मतेः स्युर्गणाधिपाः २०७॥
शतत्रयप्रमा ज्ञेया विभोः पूर्वार्थधारकाः । सहस्राणि नवैवाथ तथा नवशतान्यपि ॥२०८॥
इति संख्यान्विताः सन्ति शिक्षकाश्चरणोद्यताः । त्रयोदशशतान्येव मुनयोऽवधिभूषिताः ॥२०९॥
केवलज्ञानिनः सप्तशतसंख्याश्च तत्समाः । मुनयो विक्रियर्द्ध्याढ्याः स्युः शतानि नवास्य च ॥२१०॥
चतुर्थज्ञानिनः पूज्याः शतपञ्चप्रमाः प्रभोः । चतुःशतप्रमाणा भवन्त्यनुत्तरवादिनः ॥२११॥
सर्वे पिण्डीकृताः सन्ति सहस्राणि चतुर्दश । संयताः श्रीवर्धमानस्य रत्नत्रितयभूषिताः ॥२१२॥
आर्यिकाश्चन्दनाद्याः षट्त्रिंशत्सहस्रसंमिताः । नमन्ति तत्पदाब्जौ सत्तपोमूलगुणान्विताः ॥२१३॥
दृग्ज्ञानसद्व्रतोपेताः श्रावकाः लक्षसंख्यकाः । त्रिलक्षश्राविकाश्चास्याचर्यन्त्यङ्घ्रिसरोरुहौ ॥२१४॥
देवा देव्यस्त्वसंख्याताः सेवन्ते तत्पदाम्बुजौ । दिव्यैः स्तुतिनमस्कारपूजाद्युत्सवकोटिभिः ॥२१५॥
तिर्यञ्चः सिंहसर्पाद्याः शान्तचित्ता व्रताङ्किताः । संख्याता भक्तिका वीरं श्रयन्ते भवभीरवः ॥२१६॥
एतैर्द्वादशसंख्यातैर्गणैर्भक्तिभरोत्कटैः । संपरीतो जगन्नाथस्ततो हि विहरन् शनैः ॥२१७॥

ब्राह्मणका जीववाला देव वहाँसे चय कर यहाँपर श्रेणिक राजाके ऐसे चतुर महाप्राज्ञ अभयकुमार नामके पुत्र हुए हो। और शीघ्र ही तपसे कर्मोंका क्षय करके निर्वाणको प्राप्त होओगे ॥२०२-२०३॥ अभयकुमारकी इस पूर्वभवसम्बन्धी उत्तम कथाको सुनकर वैराग्यसे परिपूर्ण हुए कितने ही लोगोंने तो संयमको ग्रहण किया और कितने ही मनुष्योंने अपने हृदयमें श्रावक धर्म और सम्यग्दर्शनको धारण किया ॥२०४॥ इस प्रकार गौतमस्वामीसे धर्म और श्रुतरूप अमृतको पीकर अभयकुमार पुत्रके साथ श्रेणिक राजा भक्तिपूर्वक श्रीवीरजिनको और गौतम गणधरको नमस्कार कर अपने राजगृह नगरको चला गया ॥२०५॥

अथानन्तर वीर जिनेन्द्रके ग्यारह गणधरोंमें इन्द्रभूति गौतम प्रथम गणधर थे। दूसरे वायुभूति, तीसरे अग्निभूति, चौथे सुधर्मा, पाँचवें मौर्य, छठे मौण्ड्य, (मण्डिक) सातवें पुत्र (?), आठवें मैत्रेय, नवें अकम्पन, दशवें अन्धवेल, और ग्यारहवें प्रभास गणधर हुए। ये वीर भगवान्‌के सभी ग्यारह गणधर देव-पूजित और चार ज्ञानके धारक थे ॥२०६-२०७॥ भगवान् महावीरके समवशरणमें चतुर्दश पूर्वके अर्थको धारण करनेवाले तीन सौ थे। नौ हजार नौ सौ चारित्र आचरण करनेमें उद्यत शिक्षक मुनि थे, तेरह सौ मुनि अवधिज्ञानसे भूषित थे। उनके ही समान ज्ञानवाले सात सौ केवलज्ञानी थे। नौ सौ मुनि विक्रिया ऋद्धिसे युक्त थे। पाँच सौ पूज्य मनःपर्ययज्ञानी थे, चार सौ अनुत्तरवादी थे। इस प्रकार ये सब मिलकर चौदह हजार साधु श्रीवर्धमानस्वामीके शिष्य परिवारमें थे और ये सब रत्नत्रयसे विभूषित थे ॥२०८-२१२॥ चन्दन आदिक छत्तीस हजार आर्यिकाएँ थीं। वे सब उत्तम तप और मूलगुणोंसे युक्त थीं और भगवान्‌के चरण-कमलोंको नमस्कार करती थीं ॥२१३॥ सम्यग्दर्शन, सम्यग्ज्ञान और गृहस्थव्रतोंसे संयुक्त एक लाख श्रावक थे और तीन लाख श्राविकाएँ थीं। ये सभी जिनेन्द्रदेवके चरण-कमलोंको पूजते थे ॥२१४॥ असंख्यात देव और देवियाँ भगवान्‌के पादारविन्दोंकी दिव्य स्तुति, नमस्कार, पूजा और करोड़ों प्रकारके उत्सवोंसे सेवा करते थे ॥२१५॥ सिंह-सर्पादि शान्तचित्त, व्रत-युक्त, भक्तिमान् और भवभीरु संख्यात तिर्यंचोंने वीर भगवान्‌का आश्रय लिया था ॥२१६॥ भक्तिभारसे व्याप्त इन बारह गणोंसे वेष्टित उनके साथ श्रीवर्धमान तीर्थंकर देव तत्पश्चात् धीरे-धीरे विहार करते, नाना देश-पुर-ग्राम-

नानादेशपुरग्रामान् बोधयन् भव्यभाक्तिकान् । बहुधर्मोपदेशेन कुर्वन्मोक्षपथे स्थिरान् ॥२१८॥
निर्धूयाज्ञानकुध्वान्तं प्रकाश्याध्वानमूर्जिनम् । मुक्तेर्वचोंऽशुभिर्देव आजगाम क्रमान्महान् ॥२१९॥
सच्चम्पानगरोद्यानं फलपुष्पादिशोभितम् । विहृत्य षड्दिनोनानि त्रिंशद्वर्षाणि तीर्थराट् ॥२२०॥
तत्र योगं निरुध्यासौ दिव्यभाषां च निःक्रियः । मुक्तयेऽघातिहन्तारं प्रतिमायोगमाददौ ॥२२१॥
अथ देवगतिः पञ्चशरीराणि तथैव च । पञ्चसंघातनामानि पञ्चाङ्गबन्धनान्यथ ॥२२२॥
त्रीण्याङ्गोपाङ्गानि षट्संस्थानानि संहननानि षट् । पञ्च वर्णा द्विगन्धप्रकृती पञ्च रसास्तथा ॥२२३॥
अष्टौ स्पर्शास्तथा देवगत्यानुपूर्व्यंकर्म वै । ततोऽगुरुलघुश्चोपघातोऽथ परघातकः ॥२२४॥
उच्छ्वासो द्विविहायोगती चापर्याप्तिसंज्ञकः । प्रत्येकः स्थिरनामास्थिरः शुभाशुभदुर्भगाः ॥२२५॥
दुःस्वरः सुस्वरानादेया यशःकीर्तिरेव हि । असातकर्मनीचैर्गोत्रं निर्माणं जिनोत्तमः ॥२२६॥
द्वासप्ततिप्रमा एताः प्रकृतीर्मुक्तिबाधिनीः । अयोगाख्यगुणस्थानमारुह्य योगशक्तितः ॥२२७॥
तुर्यंशुक्लमहाध्यानखड्गेन सुभटो यथा । निजारातीन् जघानाशु तस्यान्त्यसमयद्वये ॥२२८॥
तत आदेयनामाथ मनुष्यगतिसंज्ञकः । ततो नरगतिप्रायोग्यानुपूर्व्यसमाह्वयः ॥२२९॥
पञ्चाक्षजातिमर्त्यायुःपर्याप्तित्रसबादराः । सुभगाख्यो यशःकीर्त्तिः सातोच्चैर्गोत्रसंज्ञकौ ॥२३०॥
तीर्थकृन्नाम तीर्थेश एतास्त्रयोदशप्रमाः । प्रकृतीस्तेन शुक्लेन तस्यान्त्यसमयेऽप्यहन् ॥२३१॥
ततोऽसौ कृत्स्नकर्मारिकायत्रयविनाशतः । निर्वाणमगमच्चोर्ध्वगतिस्वभावतोऽमलः ॥२३२॥
कार्तिकाख्ये शुभे मासे अमावास्याभिधे तिथौ । स्वातिनामनि नक्षत्रे प्रभातसमये वरे ॥२३३॥
तत्र सिद्धत्वमासाद्य सम्यक्त्वादिगुणाष्टकम् । भुङ्क्ते सुखं निरौपम्यं सोऽमूर्तो विषयातिगम् ॥२३४॥
परद्रव्यातिगं नित्यं स्वात्मजं दुःखदूरगम् । निराबाधं क्रमातीतमनन्तं परमं शुभम् ॥२३५॥

वासी जनोंको सम्बोधते, धर्मोपदेशसे मोक्षमार्गमें स्थिर करते हुए तथा अपनी वचन-किरणोंसे अज्ञानान्धकारका नाश कर और उत्तम मार्गका प्रकाश कर छह दिन कम तीस वर्ष तक विहार करके क्रमसे फल-पुष्पादि शोभित चम्पानगरीके उद्यानमें आये ॥२१७-२२०॥ वहाँपर दिव्यध्वनिको और योगको रोककर निष्क्रिय हो उन्होंने मुक्ति-प्राप्तिके लिए अघाति कर्मोंका हनन करनेवाला प्रतिमायोग ग्रहण कर लिया ॥२२१॥

तत्पश्चात् उन्होंने देवगति, पाँच शरीर, पाँच संघात नामकर्म, पाँच बन्धन, तीन अंगोपांग, छह संहनन, छह संस्थान, पाँच वर्ण, दो गन्ध, पाँच रस, आठ स्पर्श, देवगत्यानुपूर्वी, अगुरुलघु, उपघात, परघात, उच्छ्वास, दोनों विहायोगति, अपर्याप्तनाम, प्रत्येकशरीर, स्थिर-अस्थिर, शुभ-अशुभ, दुर्भग, दुःस्वर, अनादेय, अयशःकीर्ति, असातावेदनीय, नीचगोत्र और निर्माण नामकर्म इन बहत्तर संख्यावाली मुक्तिकी बाधक प्रकृतियोंको जिनोत्तम वर्धमान स्वामीने योगशक्तिसे अयोगिगुणस्थानमें चढ़कर चौथे महाशुक्लध्यानरूप खड्गसे अपने शत्रुओंको सुभटके समान उस गुणस्थानके द्विचरम समयमें एक साथ क्षय कर दिया ॥२२२-२२८॥ तत्पश्चात् आदेयनाम, मनुष्यगति, मनुष्यगत्यानुपूर्वी, पंचेन्द्रिय जाति, मनुष्यायु, पर्याप्तिनाम, त्रस, बादरनाम, सुभग, यशःकीर्ति, सातावेदनीय, उच्चगोत्र और तीर्थंकरनामकर्म इन तेरह प्रकृतियोंको वर्धमानतीर्थेश्वरने उसी शुक्ल ध्यानके द्वारा अयोगिकेवली गुणस्थानके अन्तिम समयमें क्षय कर दिया ॥२२९-२३१॥

इस प्रकार शुभ कार्तिक मासकी अमावस्या तिथिके दिन स्वाति नक्षत्रमें श्रेष्ठ प्रभात समय समस्त कर्मशत्रुओंके तीनों शरीरोंका विनाश कर उस निर्मल आत्माने ऊर्ध्वगति स्वभाव होनेसे ऊपर जाकर निर्वाण (मोक्ष) को प्राप्त किया ॥२३२-२३३॥ वहाँपर क्षायिक सम्यक्त्व आदि आठ गुणस्वरूप सिद्धपनाको प्राप्त कर वे अमूर्त वर्धमान सिद्धपरमेष्ठी उपमा-रहित, विषयातीत, परद्रव्योंके सम्बन्धसे रहित, दुःखोंसे रहित, बाधाओंसे रहित,

नृदेवखेचराधीशा आर्या म्लेच्छाश्च मानवाः । अन्ये च त्रिजगज्जीवा बुभुजुर्यत्सुखं परम् ॥२३६॥
भुञ्जन्ति यच्च भोक्ष्यन्ति तत्सर्वं पिण्डितं भुवि । तस्मादनन्तव्यतिक्रान्तं सुखं वाचामगोचरम् ॥२३७॥
एकेन समयेनैव भुङ्क्ते मोक्षे निरन्तरम् । सर्वोत्कृष्टं जगद्वन्द्योऽनन्तकालान्तमूर्जितम् ॥२३८॥
तदा चतुर्णिकायेशाः सकलत्राश्च सामराः । तन्निर्वाणं परिज्ञाय स्वैः स्वैश्चिह्नैः पृथग्विधैः ॥२३९॥
विभूत्या परया सार्धं गीतनृत्यमहोत्सवैः । अन्त्यकल्याणपूजार्थमाजग्मुस्तत्र सिद्धये ॥२४०॥
पवित्रं तद्वपुर्मत्वा विभो निर्वाणसाधनम् । शिविकान्ते व्यधुर्भूत्या स्फुरन्मणिमये सुराः ॥२४१॥
ततोऽभ्यर्च्य जगत्सारैः सुगन्धिद्रव्यराशिभिः । कायं भक्त्यानमन्मूर्ध्ना रत्नशेखरशालिना ॥२४२॥
पर्यायान्तरमेवाप सुगन्धीकृतखाङ्गणम् । तद्गात्रं शीघ्रमग्नीन्द्रमुकुटोत्पन्नवह्निना ॥२४३॥
तदादाय पवित्रं तद्भस्म शक्रादयोऽमराः । एवमस्माकमत्रास्त्वचिरान्निर्वाणसाधनम् ॥२४४॥
इत्युक्त्वा प्रथमं चक्रुर्भाले बाह्वोश्च दृग्द्वये । सर्वाङ्गेषु पुनर्भक्त्या मुदा तद्गतिशंसिनः ॥२४५॥
तत्रैव ते प्रपूज्योच्चैः पूतं तत्सुमहीतलम् । निर्वाणक्षेत्रसंकल्पं व्यधुर्धर्मप्रवृत्तये ॥२४६॥
पुनर्देवा मुदा तुष्टा संभूय समर्मूर्जितम् । आनन्दनाटकं चक्रुर्देवीभिः परमोत्सवैः ॥२४७॥
ततोऽस्य केवलज्ञानं श्रीगौतमगणेशिनः । प्रादुरासीत्सुशुक्लध्यानेन घात्यरिघातनात् ॥२४८॥
तत्रापि ते महेन्द्राद्याश्चक्रुः कैवल्यपूजनम् । इन्द्रभूतेर्गणैः सार्धं तद्योग्यभूरिभूतिभिः ॥२४९॥

क्रमसे रहित, नित्य, स्वात्मीय, परम शुभ अनन्त सुखको भोग रहे हैं ॥२३४-२३५॥ संसारमें नरपति, विद्याधरपति, देवपति, आर्य और म्लेच्छ मानव और अन्य भी तीन लोकके जीव जिस उत्तम सुखको वर्तमानमें भोग रहे हैं, भूतकालमें उन्होंने भोगा है और भविष्यकालमें वे भोगेंगे, वह सब यदि एकत्रित कर दिया जाये, तो उससे भी अनन्तगुणा वचन-अगोचर सुख मोक्षमें एक समयके भीतर भोगते हैं। ऐसा सर्वोत्कृष्ट सुख जगद्-वन्द्य वीर सिद्धप्रभु मोक्षमें निरन्तर अनन्त कालतक भोगते रहेंगे ॥२३६–२३८॥

अथानन्तर अपने-अपने पृथक् चिह्नोंसे भगवान्का निर्वाण जानकर समस्त चतुर्निकायके देवेन्द्रोंने अपने-अपने देव-परिवारके साथ परम विभूतिसे गीत-नृत्यमहोत्सव करते हुए आत्मसिद्ध्यर्थ अन्तिम निर्वाणकल्याणककी पूजा करनेके लिए वहाँपर आये ॥२३९–२४०॥ निर्वाणका साधक प्रभुका यह शरीर पवित्र है, ऐसा मानकर उन देवोंने चमकते हुए मणियों-वाली पालकीमें बड़ी भारी विभूतिके साथ उसे विराजमान किया ॥२४१॥ पुनः तीन जगत्में सारभूत सुगन्धी द्रव्य समूहसे उस शरीरकी पूजा कर भक्तिसे रत्नमुकुटधारी मस्तकसे उन्होंने उसे नमस्कार किया ॥२४२॥ तत्पश्चात् अग्निकुमार देवेन्द्रके मुकुटसे उत्पन्न हुई अग्निसे वह शरीर गगनाङ्गणको सुगन्धित करता हुआ पर्यायान्तर (भस्मभाव) को प्राप्त हुआ ॥२४३॥

तब इन्द्रादिक देवोंने 'यह हमारे भी शीघ्र निर्वाणका साधक हो' इस प्रकार कहकर उस पवित्र भस्मको हाथमें ग्रहण करके पहले मस्तकपर, फिर नेत्रोंमें, फिर बाहुओंमें, फिर हृदयपर और फिर सर्वांगोंमें भक्तिपूर्वक मोक्षगतिकी प्रशंसा करते हुए लगाया ॥२४४-२४५॥ वहींपर उस उत्तम पवित्र भूमितलको उत्कृष्ट भक्तिसे पूजकर आगे धर्मकी प्रवृत्तिके लिए उसे निर्वाणक्षेत्र संकल्पित किया ॥२४६॥ पुनः हर्षसे सन्तुष्ट हुए उन देवोंने एकत्रित होकर अपनी देवियोंके साथ परम उत्सव पूर्वक आनन्द नाटक किया ॥२४७॥

तत्पश्चात् उत्तम शुक्लध्यानसे घातिकर्मशत्रुओंके घातनेसे उन श्री गौतम गणधरमें केवलज्ञान उत्पन्न हुआ ॥२४८॥ वहाँपर जाकर उन उत्तम देवेन्द्रोंने सर्व गणके साथ उनके योग्य भारी विभूतिसे इन्द्रभूति केवलीके केवलज्ञानकी पूजा की ॥२४९॥

इति सुचरणयोगाच्छर्मसारं महद्यो नृसुरगतिषु भुक्त्वा तीर्थनाथोऽभूत्वा ।
नृखगसुरपतीड्यः कृत्स्नकर्माणि हत्वागमदनु शिवसौधं संस्तुवे वीरनाथम् ॥२५०॥

वीरो वीरजनार्चितो गुणनिधिर्वीरं सुवीराः श्रिता
वीरेणेह किलाप्यते शिवसुखं वीराय नित्यं नमः ।
वीरान्नास्त्यपरः क्षमोऽघविजये वीरस्य वीर्यं परं
वीरे चित्तमहं दधे रिपुजये मां वीर वीरं कुरु ॥२५१॥

अन्तिम मंगल-कामना

वीरो योऽत्र मया चरित्ररचनाव्याजेन मूर्ध्ना नतो
भक्त्या तद्गुणभाषणैर्निजगिरा शक्त्या स्तुतः पूजितः ।
भावेनैव मुहुर्मुहुः स जिनपो दद्याच्च मे लोभिनः
सामग्रीं सकलां विमुक्तिजननीं शीघ्रं त्रिरत्नोद्भवाम् ॥२५२॥
यो बाल्येऽपि सुसंयमं त्रिमणिजं जग्राह मुक्त्याप्तये
यं तं मे स ददातु मुक्तिजनकं चेहाप्यमुत्र स्फुटम् ।
यः सद्ध्यानमहासिनाखिलरिपून शीघ्रं जघानोर्जितान्
मेऽसौ कर्मरिपून् खचौरसहितान् हन्याद् द्रुतं मुक्तये ॥२५३॥
येनाप्ताख्रिजगत्स्तुता वरगुणा सीमातिगा निर्मलाः
कैवल्यप्रमुखाः स तान्निजगुणान् सर्वान् प्रदद्यान्मम ।
तस्माद्येन शिवात्मजा त्रिविधिना वीरेण भोः स्वीकृता
क्षिप्रं मे स तनोतु मुक्तिममलां चान्तातिगां शर्मणे ॥२५४॥

इस प्रकार उत्तम चारित्रके योगसे जो देव और मनुष्यगतिमें सारभूत महासुखको भोगकर और तीर्थके नाथ होकर, नरपति, खगपति और सुरपतियोंसे पूजित हो और तत्पश्चात् सर्व कर्मोंका नाश कर शिव-सदनको प्राप्त हुए, उन वीरनाथकी मैं सकलकीर्ति स्तुति करता हूँ ॥२५०॥ वीरजिन वीरजनोंसे पूजित हैं, गुणनिधि हैं, वीरजिनको वीरजन ही आश्रित होते हैं, वीरके द्वारा ही इस लोकमें शिवसुख प्राप्त किया जाता है, अतः वीरके लिए मेरा नित्य नमस्कार है। वीरसे परे दूसरा कोई भी पापकर्मोंको जीतनेमें समर्थ नहीं है, वीरका वीर्य परम श्रेष्ठ है, मैं वीर जिनमें अपना मन लगाता हूँ, हे वीर, शत्रुको जीतनेमें मुझे वीर करो ॥२५१॥

अन्तिम मंगल-कामना

मैंने चरित्रकी रचनाके बहाने जो वीरप्रभुको मस्तकसे नमस्कार किया है, भक्तिपूर्वक अपनी वाणीके द्वारा शक्तिके अनुसार उनके गुणोंका वर्णन कर उनकी प्रशंसा और स्तुति की है एवं शुभ भावोंसे बार-बार उनकी पूजा की है, ऐसे वे श्रीवीर जिनेन्द्र मुझ लोभीको मुक्तिको प्राप्त करानेवाली और सम्यग्दर्शनादि तीन रत्नोंसे उत्पन्न होनेवाली सकल सामग्रीको शीघ्र देवें ॥२५२॥ जिस वीरप्रभुने बालकाल (कुमारावस्था) में भी मुक्तिकी प्राप्तिके लिए रत्नत्रय-जनित उत्तम संयमको ग्रहण किया, जिन्होंने उत्तम शुक्लध्यानरूपी महान् खड्गके द्वारा अति प्रचण्ड सर्व कर्मशत्रुओंको विनष्ट किया, वे वीर प्रभु मुझे इस लोक और परलोकमें मुक्ति-दाता संयम और रत्नत्रयको देवें, तथा इन्द्रियरूपी चोरोंके साथ मेरे सब कर्मशत्रुओंका मुक्ति पानेके लिए शीघ्र विनाश करें ॥२५३॥ जिन्होंने तीन लोकसे स्तुति किये गये अनन्त निर्मल केवलज्ञानादि उत्तम गुण प्राप्त किये हैं, वे वीर प्रभु उन सब अपने गुणोंको मुझे

न कीर्तिपूजादिकलाभलोभतो नाहो कवित्वाद्यभिमानतोऽत्र ।
ग्रन्थः कृतोऽयं परमार्थबुद्ध्या स्वान्योपकाराय च कर्महान्यै ॥२५५॥
वीरनाथगुणकोटिनिबद्धं पावनं वरचरित्रमिदं च ।
शोधयन्तु सुविदश्च्युतदोषाः सर्वकीर्तिगणिना रचितं यत् ॥२५६॥
यत्किंचिद्विहितं मयात्र च शुभे ग्रन्थे प्रमादात्क्वचि-
दज्ञानादथवाक्षरादिरहितं सन्ध्यादिमात्रोज्झितम् ।
तत्सर्वं मम तुच्छधीश्रुतविदो दृष्ट्वा परं साहसं
सद्वृत्तोद्धरणे समं जिनगिरा यूयं क्षमध्वं विदः ॥२५७॥
ये पठन्ति निपुणा, श्रुतमेतत्पाठयन्ति गुणिनो गुणरागात् ।
ते समाप्य विरतिं विषयादौ ज्ञानतीर्थमचिराच्च लमन्ते ॥२५८॥
लिखन्ति ये ग्रन्थमिदं पवित्रं वा लेखयन्ते भुवि वर्तनाय ।
ते ज्ञानदानेन किलाप्य सौख्यं विश्वोद्भवं केवलिनो भवन्ति ॥२५९॥
सर्वे तीर्थकराः परार्थजनकाः श्रीभुक्तिमुक्तिप्रदाः
सिद्धा अन्तविवर्जिता निरुपमास्त्रैलोक्यचूडोपमाः ।
पञ्चाचारपरायणाश्च गणिनः श्रीपाठकाः सद्विदः
उद्योगाङ्कितसाधवः शुभकरं कुर्वन्तु वो मङ्गलम् ॥२६०॥
प्रवरगुणसमुद्रं धर्मरत्नादिखानि
....सुशरणमिहभव्यानां महेन्द्रादिपूज्यम् ।
सुरशिवगतिमूलं शासनं श्रीजिनस्य
त्रिभुवनगतभव्यैर्यातु वृद्धिं धरित्र्याम् ॥२६१॥

प्रदान करें। जिन वीर जिनेन्द्रने मुक्तिरूपी कुमारीको विधिपूर्वक स्वीकार किया है, वे प्रभु वह अनन्त निर्मल मुक्तिलक्ष्मी सुख-प्राप्तिके लिए मुझे देवें॥२५४॥ मुझ सकलकीर्तिने यह ग्रन्थ कीर्ति, पूजा के लाभ या किसी प्रकारके लोभसे नहीं रचा है और न कविपनेके अभिमानसे ही रचा है, किन्तु इसकी रचना परमार्थ बुद्धिसे अपने और अन्यके उपकारके लिए तथा अपने कर्मोंके विनाशके लिए की है ॥२५५॥ वीर जिनेन्द्रके कोटि-कोटि गुणोंसे निबद्ध यह पावन श्रेष्ठ चरित्र, जिसे सकलकीर्ति गणीने रचा है, उसे दोषोंसे रहित सुज्ञानी जन शुद्ध करें ॥२५६॥ इस शुभ ग्रन्थमें मेरे द्वारा प्रमादसे, अथवा अज्ञानसे यदि कहीं कुछ अक्षरादिसे रहित, या सन्धि-मात्रासे रहित अशुद्ध या असम्बद्ध लिखा गया हो, तो श्रुतवेत्ता ज्ञानी जन इस उत्तम चरित्रके जिन वाणीसे उद्धार करनेमें मुझ तुच्छ बुद्धिका भारी साहस देखकर आप लोग मुझे क्षमा करें ॥२५७॥ जो निपुण बुद्धिवाले लोग इस शास्त्रको पढ़ते हैं और गुणियोंके गुणानुरागसे दूसरोंको पढ़ाते हैं वे अपने विषय-कषायादिमें विरतिभावको प्राप्त होकर केवलज्ञानरूपी ज्ञानतीर्थको शीघ्र प्राप्त करते हैं ॥२५८॥ जो भव्य श्रावकजन इस पवित्र ग्रन्थको लिखते हैं और भूमण्डल पर प्रसार करनेके लिए दूसरोंसे लिखाते हैं, वे अपने इस ज्ञानदानके द्वारा विश्वमें उत्पन्न होनेवाले सुखोंको प्राप्त कर निश्चयसे केवलज्ञानी होते हैं ॥२५९॥ परके उपकारक, सांसारिक लक्ष्मी, स्वर्गीय भोग और मुक्तिके प्रदाता, सभी तीर्थंकर, अन्त-रहित उत्कृष्ट अवस्थाको प्राप्त, उपमासे रहित और तीन लोकके चूड़ामणि, सभी सिद्ध भगवन्त, पंच आचारोंमें परायण, सभी आचार्य, उत्तम श्रुतवेत्ता, सभी उपाध्याय और आत्म-साधनके उद्योगसे युक्त, सभी साधुजन आप लोगोंका शुभ करनेवाला मंगल करें ॥२६०॥ यह वीर जिनेन्द्रदेवका चरित गुणोंका समुद्र है, धर्मरत्न आदिकी खानि है, भव्योंको

अर्थाढ्यं धर्मबीजं ख-विरतिजनकं वीरनाथस्य दिव्यैः
सार्थैस्तथ्यैर्गुणौघैर्निचितमपमलं रागनिर्णाशहेतुम् ।
कर्मघ्नं ज्ञानमूलं विशदमुनिगणैः पावनं तच्चरित्रं
यावत्कालान्तमत्रासमगुणगहनैर्नन्दतादार्यखण्डे ॥२६२॥

येनोक्तो धर्मसारः सुरशिवगतिदस्त्यक्तदोषो गुणाब्धिः
द्वेधा हिंसादिदूरो गृहिजनमुनिभिर्वर्ततेऽद्यापि नित्यम् ।
स्थास्यत्यग्रेऽत्र नूनं परमसुखकरो यावदस्यावधिः स्यात्
कालस्यासौ जिनेशो मम हरतु भवं वन्दितः संस्तुतश्च ॥२६३॥

जल्पितेन बहुना किमाश्रयेद्वीरनाथ इह यो मया स्तुतः ।
मे ददातु कृपयाशु सोऽद्भुतान् मुक्तये निजगुणान् स्वशर्मणे ॥२६४॥
त्रिसहस्राधिकाः पञ्चत्रिंशच्छ्लोकाः भवन्ति वै ।
यत्नेन गुणिताः सर्वे चारित्रस्यास्य सन्मतेः ॥२६५॥

इति भट्टारकश्रीसकलकीर्तिविरचिते श्रीवीरवर्धमानचरिते श्रेणिकाभयकुमारभवावली-भगवन्निर्वाणगमनवर्णनो नामैकोनविंशोऽधिकारः ॥१९॥

शरण देनेवाला है, इन्द्रादिकोंके द्वारा पूज्य है, स्वर्ग और मोक्षका मूल कारण है, एवं परम पवित्र है, वह कालके अन्त-पर्यन्त इस आर्यखण्डमें सर्वत्र प्रसिद्धिको प्राप्त हो ॥२६१॥ यह चरित्र सुन्दर अर्थसे संयुक्त है, धर्मका बीज है, इन्द्रियोंके विषयोंसे विरक्तिका उत्पादक है, सत्यार्थ गुणोंसे युक्त है, निर्मल है, रागके नाशका कारण है, कर्मोंका विनाशक है, ज्ञानका मूल है, निर्मल मुनिजनोंके गुणोंसे पवित्र है, और अतुल गुणोंसे गहन है ॥२६२॥ जिस वीर प्रभुने स्वर्ग और शिवगतिका देनेवाला, दोषोंसे रहित, गुणोंका समुद्र, हिंसादिसे दूरवर्ती परम अहिंसामयी धर्मके सारवाला यह धर्म गृहस्थ और मुनिके रूपसे दो प्रकारका कहा है, जो आज भी गृहस्थ और मुनिजनोंके द्वारा नित्य प्रवर्तमान है और आगे भी नियमसे प्रवर्तमान रहेगा, वह परम सुखका करनेवाला जैनधर्म जब तक इस कालकी अवधि हो, तब तक सदा प्रवर्तमान रहे। इस धर्मके उपदेष्टा, एवं मेरे द्वारा वन्दित और संस्तुत वे जिनेन्द्र देव मेरे संसारको हरें ॥२६३॥ इस विषयमें अधिक कहनेसे क्या, जिन वीरनाथका मैंने आश्रय लिया है, और इस ग्रन्थमें मैंने जिनकी स्तुति की है, वे कृपाकर शीघ्र ही अपने अद्भुत गुणोंको मुक्ति और आत्मीय सुखकी प्राप्तिके लिए मुझे देवें ॥२६४॥

श्री सन्मतिके इस चरित्रके यत्नसे गणना किये गये सर्वश्लोक तीन हजार पैंतीस हैं। अर्थात् मूल संस्कृतचरित्र तीन हजार पैंतीस (३०३५) श्लोक प्रमाण है।

इस प्रकार भट्टारक श्री सकलकीर्ति-विरचित इस श्रीवीरवर्धमानचरितमें श्रेणिक राजा, और अभयकुमारकी भवावली तथा भगवान्‌के निर्वाण-गमनका वर्णन करनेवाला यह उन्नीसवाँ अधिकार समाप्त हुआ ॥१९॥

परिशिष्ट

१ : श्लोकानुक्रमणिका

अ. श्लो.

[अ]

अकम्पनादयो भूपा २.६५
अकम्पनोऽन्धवेलाख्यः १९.२०७
अकारणजगद्बन्धवो १.६४
अक्रच्छायामराधीशाः १५.३८
अग्निवाहननामामित- १४.५६
अङ्गाङ्गबाह्यसद्भाव- १९.१५१
अजीवतत्त्वमादेयं १७.४९
अज्ञानतपसाथासौ २.१०५
अज्ञानतपसा मूढा १७.९१
अज्ञानेन कृतं पापं १०.९३
अज्ञानोच्छित्तये ज्ञान- १६.३
अटवीग्रामखेटादीन् ५.१७,४.१०८
अटाद्युभूनृनाथानां ८.९१
अणुस्कन्धविभेदाभ्यां १६.११७
अतः कालं विना ते १६.१३८
अतः पुण्यात्मिके पुण्यं ७.८५
अतः स्वामिन् नमस्तुभ्यं १२.२७
अतस्तत्र मुनीन्द्रं २.२२
अतस्त्वं त्रिजगत्स्वामी १५.१५३
अतिकायो महाकाय १४.६०
अतीता मेऽपरेऽनन्ताः १.३६
अतीव रूपसौन्दर्य- ७.३७
अतीव कामसेवान्धः १७.१००
अतो गत्वा करोम्याशु १५.११२
अतो गत्वा विधेहि त्वं ७.४४
अतो न जलं तीर्थं १५.१८५
अतोऽत्यल्पायुषां नैवा- १०.८७
अतो धर्मसमो बन्धुः ६.१५४
अतोऽत्र शास्त्रकर्तृणां १.७१
अतोऽत्रासन्नभव्यानां १६.६४
अतोऽत्रेदं जगत्पूज्यं २.८८

अ. श्लो.

अतो देव नमस्तुभ्यं ९.८१,
१९.३८,१५.६८,१५.१६२
अतो देव वयं कुर्मः ८.९४
अतो देव विधेहि त्वं १९.३१
अतो देवात्र किं साध्यं १९.३६
अतो दुर्गतिनाशाय ४.२२
अतो धीर कुरूद्योगं १२.२५
अतो न क्षीयते यावत् ३.१२
अतो ये विषयासक्ता ५.९६
अतो विचक्षणैः कार्यः ४.१०२
अतो वैषयिकं सौख्यं ५.९
अतोऽस्माभिर्न बोध्यस्त्वं १२.१०
अतोऽहमधुना छित्वा ५.१०३
अतोऽहं च क्व गच्छामि ३.१२९
अतोऽस्य परमं धैर्यं ४.५३
अत्यन्तदुर्लभो बोधि- ११.११३
अत्यन्तमोहितः पाप- १७.६९
अत्यासन्नभवप्रान्ते १५.८०
अत्र तेषां समस्तानां ३.१२८
अत्र नाथ नम- १०.३६,१३.८०
अत्रः निःसङ्गनिश्चेल- १९.१४४
अत्र संकल्पिताः कामाः ६.१२०
अत्रापि पूर्ववद् ज्ञेया १४.१६२
अथ कालत्रयोत्पन्नं १५.१०२
अथ काश्चिच्च धात्र्यस्त्वं १०.२
अथ गौतम धीमंस्त्वं १८.२
अथ चेटकराजस्य १३.८४
अथ जम्बूद्रुमोपेतो २.२
अथ जम्बूमति द्वीपे ४.१२१
अथ जम्ब्वाह्वये द्वीपे ५.१३४
अथ तत्केवलोत्पत्ति- १४.२
अथ तज्ज्ञानपूजायै १४.१३

अ. श्लो.

अथ तस्मिन् खगाद्रु- ३.७१
अथ ते सप्ततत्त्वा हि १७.२
अथ ते सामरा देवा- १५.२८
अथ दुःषमकालाख्यः १८.११९
अथ देवगतिः पञ्च १९.२२२
अथ नाथ भवद्वाक्यांशु- १९.१४
अथ नाथ वयं धन्याः १९.८८
अथ पुद्गल एवात्र १६.११५
अथ प्राग्घातकीखण्डे ४.७२
अथ मङ्गलधारिण्यः ८.२
अथ मोहाक्षशत्र्वोघा- १२.२३
अथवा निखिला जीवाः १७.४७
अथवा महतो योगाद् १५.११७
अथवा मोहिनां तत्किं ३.२९
अथवा सूक्ष्मसूक्ष्मादि- १६.११८
अथवा स्वर्गसाम्राज्यं ६.१५३
अथवाहमिहानीतः ६.११३
अथ शान्ते जन- १९.२,१२.९२
अथ सद्धातकीखण्डे ५.३५
अथ सारस्वता देवा १२.२
अथ सौधर्मकल्पेशः ८.६९
अथ सौधर्मकल्पेशो ७.४२
अथ सौधर्मनाकेशो ९.८
अथ स्वामी महावीरः ११.२
अथातो निर्गते सूनौ १२.६९
अथान्यदा निजोद्याने ३.१८
अथान्येद्युर्महावीरः १०.८१
अथान्येद्युः स कालाप्त्या ५.२
अथान्येद्युः सुराः प्राहुः १०.२३
अथाभिषेकसंपूर्णे ९.४८
अथासौ कर्मशत्रुघ्नं १२.१३७
अथासौ गौतमस्वामी १६.३

अथासौ त्रिजगत्स्वामी २.९२
अथासौ भगवान् वर्ध- १३.९९
अथास्मिन्नादिमे द्वीपे ३.६१
अथास्मिन् मागधे देशे ३.६
अथास्मिन् भारते रम्ये ३.१२१
अथाहमेव धन्योऽहो १८.१४४
अथेह प्राक्तने रम्ये २.१२५
अथेन्द्रभूतिरेवाद्यो १९.२०६
अथेह भारतस्यार्ध- १८.८५
अथेह भारते क्षेत्रे ७.२,२.५०,
३.११७
अथेह भारते पुर्यां २.१०७
अथेह मगधे देशे ३.२
अथेह विजयार्धोत्त र- ३.६८
अथैकदा नरेशोऽसौ ५.७४
अथैकदा महादेवी ७.५९
अथैकदा स धर्मार्थं ६.२
अथैतस्य वियोगेन ३.१४७
अथैवात्र पुरे रम्ये २.११२
अथैष नारकः श्वभ्रा- ४.२
अथैषोऽतीव शक्तोऽपि १३.२
अथोत्पत्य गुणस्थानं १३.१२४
अथोत्पेतुर्नभोभागं ८.९७
अथोल्लङ्घ्य प्रतोलीं १४.१४९
अन्तराया इमा घाति- १३.१२७
अपकारोऽप्यहो लोके ३.४१
अपवित्रेण देहेन ११.६३
अपरं च महद्दुःखं ४.३२
अपराह्ले स्वयोग्यानि ४.१३३
अप्रमाणैर्गुणैश्चान्यैः १०.२१
अदन्तधावनं राग- १८.७६
अद्य जन्माभिषेकेण ९.७७
अद्य देव वयं धन्याः १५.६२
अद्य नाथ वयं धन्याः ६.११८
अद्य नः सफलं जन्म १५.६३
अद्य प्रभृति तेनास्ति ४.४८
अद्य प्रवर्तते देवं ८.९३
अद्य मेऽभून्मनः पूतं १९.९१
अद्य मे सफले नेत्रे १९.८९
अद्याहं सुकृतीभूतो १३.११

अद्राक्षीद् रत्नराशिं च ७.६८
अधीत्य जैनसिद्धान्त ४.१२५
अधुना यद्यनेनामा १५.१११
अधो वेत्रासनाकारो १८.१२६
अनन्तकालपर्यन्तं १७.८०
अनन्तं केवलज्ञानं १५.१५२
अनन्तगुणवाराशेः १८,२७
अनन्तगुणशर्माढ्यं ११,११२
अनन्तजन्मसंतानं ६.२९
अनन्तदर्शिने तुभ्यं १५.७०
अनन्तदुःखसंतान- ६.२१
अनन्तमहिमारूढो १४.१८३
अनन्तसुखसंलीनाः ११.११०
अनन्तं परमं सौख्यं १५.१५६
अनघं मृत्युपर्यन्तं ४.११०
अनन्यविषया एते १९.६१
१५.१५७
अनन्यशरणानन्यान् १७.२०३
अनर्घ्यदृष्टिचिद्वृत्त- ९.७२
अनर्घ्यमणिकोटीनां १३.२५
अनर्घ्यस्तत्प्रणीतोऽयं १८.१४५
अनादिकर्मजल्लादीन् १.२३
अनाहताः पृथुध्वाना ८.६४
अनित्याशरणे संसा- ११.३
अनिवार्या भवत्कीर्तिः १०.३४
अनिष्टयोगजं स्वेष्ट ६.४७
अनिष्टं यद्भवेत्स्वस्य १७;३३
अनुभूय महादुःख- ४,४
अनेन स्तवसद्भक्ति- १९:४३
अनेन स्तवनेनात्रा १२.३१
अनेन स्तवनेनेड्य १२.१३३
अन्तावस्था ममायाते १९.१२३
अन्धा मूकाः कुरूपाश्च १७.१७
अन्यत्वं स्वात्मनो ज्ञात्वा ५.८१
अन्यस्त्वं स्वात्मनो विद्धि ११.४४
अन्यदा धर्मगोष्ठीभिः ५.१३२
अन्यदा नर्तनं चित्रं १०.४०
अन्यानि शुभपाकानि १.८१
अन्या माता पिताप्यन्यो ११.४५
अन्ये च बहवो भव्याः १८.१५०

अन्ये ते गणनातीता १५.१५९
अन्येद्युर्भार्यया सार्धं ४.८२
अन्येद्युर्वत्सदेशस्य १३.९१
अन्येद्युः शरदभ्रस्य ३.१०
अन्येद्युः स्वगुणोत्पन्न- १०,३९
अन्ये धीरा भजन्ति स्म ७,७६
अन्येऽपि बहवो भूताः १.५६
अन्ये सुपात्रदानेन २.५३
अन्यैरन्तातिगैर्दिव्यैः १९.८०
अब्धिना केवलज्ञानी ७.१००
अभक्ष्याः सर्वथा १८.५३
अभीक्ष्णभङ्गपूर्वादि ६.८२
अभूर्मरीचिनामेह ४.२७
अभ्यन्तरं तपः सर्वं १२.५०
अमीभिरष्टभिः सारैः ६.७९
अभीमिर्लक्षणैः सारैः ६.१५
अमीषां लोकपालानां ६.१३३
अमीषां वचसा दक्षा १.६८
अमी विंशतिदेवेन्द्राः १४.५७
अमुत्र येन जायन्ते ४.८८
अमूनि प्रोत्तमान्यत्र ११.१२४
अमूर्तान् मनसा ध्येयान् १.३९
अमूंस्तीर्थेशसद्भूति– ६.९७
अम्लानकुसुमैर्वृष्टि ८.६३
अयमेव जगन्नाथः १६.८९
अयं प्रासुक आहारो १३.१९
अयंस्तन्महतां वीरः ९.८९
अर्ककीर्तिस्तयोः सूनुः ३.७५
अर्थरूपेण पूर्वाह्ले १८.१६४
अर्थादयं धर्मबीजं १९.२६२
अर्थोत्थमवगाढं १९.१४२
अर्हतां गुणराशीका १९.६
अर्हद्दासः स तद्गर्व- १९.१९१
अर्हद्भक्ताः सदाचाराः १.७३
अर्हद्भानूदये यद्वत् ७.७९
अवगाह्याङ्गवार्धिं च १९:१५०
अवसर्पात्समास्या १८.८७
अविद्धछिद्रयोश्चारु ९.५४
अव्याबाधा अरिष्टा १२.३
अशीत्यग्रं सहस्रं स्युः १४;१२३

अशुद्धनिश्चयेनासौ १६,१०५
अशुभप्रकृतीनां स्या- १६.१६१
अशोकवनमध्ये स्या- १४.१२२
अशोकसप्तपर्णाख्य- १४-१०८
अश्रुतं परयोषादि १००.१०४
अश्वग्रीवाभिधो धीमा- ३.७०
अश्वग्रीवोऽपि तेनाप्य ३.१०४
अश्वग्रीवोऽर्धचक्री च १८.११४
अश्ववाहनमारूढ- १४.४२
अष्टकर्माङ्गनिर्मुक्ता १६.३४
अष्टमीन्दुसमाकार- ७.३६
अष्टम्यां च चतुर्दश्यां ४.१२९
अष्टम्यां यच्चतुर्दश्यां १८.५६
अष्टमे वत्सरे देवो १०.१६
अष्टादशसमुद्रायु- ५.१२६
अष्टादशसहस्र- ५.५४
अष्टादशसहस्रप्रम- ६.८१
अष्टादशसहस्राब्दै- ५.१२७
अष्टादशसहस्रौघ- १३.१०२
अष्टानवतिभेदादि- १६.४९
अष्टाविमा महादेव्यो ६.१३४
अष्टाशीत्यङ्गुलान्येषां १४.१४०
अष्टोच्छ्रिता पवित्राङ्गा ८.११९
अष्टोत्तरसहस्रप्रमैः १०.१९
अष्टौ मंगलवस्तूनि ८.८५
अष्टौ स्पर्शास्तथा देव १९.२२४
असमगुणनिधानं १४.१८६
असंख्यनृसुराराध्यो ८.१८
असंख्यसंख्यविस्ताराः ६.१२६
असंख्यातप्रदेशी १६.१०४
असंख्याताः स्वदेव्याढ्या १४.५३
अस्माकं प्राणसंदेहो २.८१
अस्मिन् वनान्तरेऽभूवन् १४.१३३
अस्यादौ द्विकरोत्सेधा १८.१२३
अस्याऽऽसन् परपुण्येन ५.५०
अस्यास्तोरणमाङ्गल्य- १४.१४८
अस्यां मम प्रतिज्ञायां १५.९६
अहमिन्द्रपदं केचित् १९.२८
अहमिन्द्रसुरेशादीन् ४.१००
अहमिन्द्रादयो देवा १६.१७९
अहं चोपरि गच्छामि ३.२३
अहिंसादीनि साराणि १८.७४
अहिंसालक्षणो धर्मो २.९
अहिंसासत्यमस्तेयं ४.९०
अहो ईदृक् तपःकर्ता २.१०६
अहो एष जगद्-भर्ता २.८०
अहो एष मयोपायो १५.८५
अहो केयं धरा निन्द्या ३.११९
अहो कोऽहं सुपुण्यात्मा ६.१०८
अहो दृग्ज्ञानवृत्तादि- ५.५
अहो धिगस्तु मोहोऽयं ३.३६
अहो तीर्थेशिनामेषा १६.३१
अहो परहितार्थ्येव ४.९८
अहो पश्य पितृव्योऽयं ३.२८
अहो पश्य महच्चित्रं १२.६१
अहो पश्येदमत्यन्तं ७.५३
अहो पश्येदमत्रैप १३.३२
अहो पुण्यविधिः पुंसां १३.९५
अहो प्रभोः सुमाहात्म्यं १२.४८
अहो भुक्ता जगत्साराः ५.९५
अहो मध्ये मुनीशानां १५.८१
अहो मन्येऽहमत्रैत्रं १५.१०९
अहो मया पुरा घोरं ६.१४९
अहो मया पुरा जीव ३.१२२
अहो मिथ्यात्वमार्गोऽयं १८.१३३
अहो यथेदमभ्रं हि ३.११
अहो यथेह लभ्यन्ते १३.२९
अहो वृत्तेन येनैष ६.१५७
अहो वृथा गतान्यत्र १०.८४
अहो वीर जिनस्वामी १०.२४

[आ]

आकर्ण्य तद्वचः केचित् १३.३४
आकर्ण्य तद्वचो योगी ४.८५
आकिञ्चन्यमनुष्ठेयं ६.१३
आकिञ्चन्यं महद्ब्रह्म- १८.८१
आक्रन्ददुःखशोकादीन् १७.१२०
आक्रम्य मागधादींश्च ५.४७
आकृष्टा धर्ममन्त्रेण ११.१२८
आगच्छन्तीं नृपो वीक्ष्य ७.९०
आगत्योत्क्षिप्य तं केचित् ३.१३४
आचार्याणां गणाचर्यानां ६.९०
आचार्यादि-मनोज्ञान्तानां ६.४४
आचार्योऽध्यापकः शिष्यः ६.८७
आचार्योक्तं श्रुतं सम्यक् १.७४
आचाराख्यादिमाङ्गोक्त १९.१४६
आजगाम सुरैः सार्धं १२.८७
आजन्मान्तं प्रपाल्योच्चैः २.३७
आज्ञाख्यं मार्गसम्यक्त्वं १९.१४१
आज्ञापायविपाकाख्य- ६.५१
आज्ञैश्वर्यादृते शक्र- १४.२८
आतापनादियोगेषु १८.१५८
आत्मनः स्यात्पृथग्भूतं ११.४७
आतापनादियोगोत्थान् १२.९७
आदर्शप्रमुखा अष्टौ १९.७७
आदिकल्पाधिपो देवः ७.१२३
आदितीर्थकरोत्पन्न- ३.८८
आदितीर्थकरोत्पत्तौ २.५७
आदौ तं मुक्तिभर्तार- १२.३८
आदौ तां शिबिकामूहुः १२.४६
आदौ दृष्टिविशुद्धयर्थं ६.६२
आदौ मूलगुणान् सम्यक् १८.७९
आदौ समयसारं स ९.११४
आद्यक्ष्मान्तावधिज्ञान- ४.६७
आद्यन्तदुःखसन्मिश्र- १२.११३
आद्यं संहननं तस्य १०.६२
आद्याः कषायचत्वारो १३.११०
आद्याद्द्विगुणसंख्याता १४.३५
आद्यादिससमान्तं १७.७२
आनतेन्द्रादयः शेषाः १४.४७
आनन्दनाटकं दिव्यं ९.१११
आपादमस्तकान्तं १६.१७४
आमनन्ति मुनीन्द्रास्त्वां ८.९०
आयाते मन्दतां यौवन-१०.१०२
आयान्ती सा नभोभागा १५.३
आयुर्नित्यं यमाक्रान्तं ११.५
आयुर्विश्ववपुर्भोग- ५.७७
आर्तरौद्रातिदुर्ध्यानैः १७.५
आराधिता जगत्पूज्याः ६.१७
आराध्याराधनाः सर्वाः ४.११२

आर्या आर्यस्वभावेन १८.९३
आर्यिकाश्चन्दनाद्याःषट्१९.२१३
आरुरोह मुदा शक्र- १२.४४
आरुह्य शिविकां गत्वा २.७३
आशाक्षयकरं वृत्ति- ६.२४
आस्थानमण्डले चास्य १९.६६
आसाद्यानु निजं स्थानं ४.६५
आसां सन्त्यत्र प्रत्येकं ६.१३५
आसीत्स्मागुणेनासा- १३.५२

[इ]

इच्छन्ति नाकिनो यस्या- २.६३
इतस्ततः स्वदोर्जलि ९.१३७
इति कुपथविपाकात् २.१३६
इति कृत्वा स्तुतिं तस्य १३.८१
इति गार्हस्थ्यधर्मेण १८.७३
इति चतुर्विधो बन्धो १६.१६६
इति क्षणक्षणोत्पन्नो १६.१६३
इति ज्ञात्वा दृढीकार्यं १८.१३
इति तद्बोधनं श्रुत्वा १९.१९६
इति तद्वचनस्यान्ते १९.१७०
इति तन्नियमं श्रुत्वा १९.११३
इति तन्वन् मुदात्मीयं ९.१२८
इति तत्प्रश्नतोऽवादी- ४.३८
इति तद्वचसा त्यक्त्वा २.३१
इति तद्वचसा भीता २.८९
इति तद्वाक्यमाकर्ण्य ४.९७
इति तद्दुर्वचः श्रुत्वा ३.५३
इति तत्सकथां श्रुत्वा १९.२०४
इति तत्सारमाङ्गल्य- ७.८६
इति तस्योक्तमाकर्ण्य ६.२०
इति ताभिः प्रयुक्तानां ८.५३
इति तेनोक्तसद्वाक्ये ३.८०
इति तेपे चिरं वीरः १३.५१
इति दातृगुणान् सप्त १३.२१
इति द्वादशकल्पेन्द्राः १४.४८
इति द्वादश भेदानि ६.५५
इति धर्मात्तचित्तोऽसौ ५.३०
इति परमविभूत्या तीर्थ- ८ १२६
इति पापफलं ज्ञात्वा १७.२२
इति प्रश्नवशाद्देवो १६.२६
इति प्रार्थ्य तदादेशं ३.२५
इति बर्हादिकेष्वेषु १४.१२२
इति भगवति वृत्ता १३.१३३
इति मत्वा क्वचित्पापं १०.९४
इति मत्वा न कर्त्तव्यं २.१३५
इति मत्वा बुधैः कार्यः ६.१५६
इति मत्वा बुधैरादौ १८.१४३
इति मत्वा स पापात्मा-१९.१६५
इति मोहमहारातिं १३.१२३
इति विगतविकाराः ११.१३४
इति विगतविकारो १२.१३९
इति विबुधपतीड्यो १५.१७०
इति विशदगिरासौ १७.२०८
इति वृषपरिपाकाद् १८.१६९
इति वृषपरिपाकादाप्य ६.१७४
इति लोकत्रयं ज्ञात्वा ११.१११
इति शक्रोक्तितः पूर्वं १९.४६
इति शिवगतिहेतून् १६.१८३
इति शुभपरिणामा- १०.१०६
इति शुभपरिपाकान्नन्द-५.१४७
इति श्रीजिनवक्त्रेन्दू- १८.१३१
इति सकलसुयुक्त्या १.८६
इति संख्यान्विताः १९.२०९
इति संबोधनोपायैः १९.१८९
इति सर्वपदार्थानां ४१.७६
इति सुकृतविपाकात् ४.१४१
इति सुकृतविपाकात्प्राप ९.१४३
इति सुचरणयोगाद् ३.१४९
इति सुचरणधर्माच्छर्म- ७.१२४
इति सुचरणयोगाच्छर्म-१९.२५०
इति स्तुतिनमस्कार- १५.७४
इति स्तवननमस्कार- १५.११६
इति स्तुत्वा जगन्नाथं १२.३३
